**२०२१-२२**

**शास्त्री-परीक्षा**

**खण्डः–द्वितीयः, अधिसत्रम्–प्रथमम्**

**विषयः- अनिवार्यसंस्कृतम्, पत्र- द्वितीयम्**

---

**समयः - ३½होराः** **सम्पूर्णाङ्कः – ७०**

**निर्देशः – एकस्यां पंक्तौ दश शब्दाः प्रतिपृष्ठं च अष्टौ पंक्तयो लेख्याः ।**

**१. अधोलिखितेषुद्वौश्लोकौ सन्दर्भोल्लेखपुरस्सरं व्याख्येयौ-** **१५**

**क.** बोधाय जातोऽस्मि जगद्धितार्थमन्त्या भवोत्पत्तिरियं ममेति।

चतुर्दिशं सिहगतिर्विलोक्य वाणीं च भव्यार्थकरीमुवाच।।

**ख.** इक्ष्वाकुवंशार्णवसम्प्रसूतः प्रेमाकरश्चन्द्र इव प्रजानाम्।

शाक्येषु साकल्यगुणाधिवासः शुद्धोदनाख्यो नृपतिर्बभूव।।

**ग.** दीप्त्या च धैर्येण च यो रराज बालो रविर्भूमिमिवावतीर्णः।

तथातिदीप्तोऽपि निरीक्ष्यमाणो जहार चक्षूंषि यथा शशाङ्कः।।

**घ.** अदृश्यरूपाश्च दिवौकसः खे यस्य प्रभावात् प्रणतैः शिरोभिः।

अधारयन् पाण्डुरमातपत्रं बोधाय जेपुः परमाशिषश्च।।

**२. अधोलिखितासु सूक्तिषु द्वयोः आशयं संक्षेपेण स्फुटीकुरुत।** **१०**

**क.** सार्धं तयाऽसौ बुभुजे नृपालः।

**ख.** सा लुबिनीनाम्नि वने मनोज्ञे।

**ग.** तस्मिन् वने श्रीमति राजपत्नी।

**घ.** लोकस्य मोक्षाय गुरौ प्रसूते।

**३. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः-** **४**

**क.** बुद्धचरिते कति सर्गाः?

**ख.** बुद्धचरितस्य रचयिता कः?

**ग.** बुद्धस्य पितुः नाम किम्?

**घ.** बुद्धस्य माता स्वप्रे किं ददर्श?

**४. अश्वघोषस्य काव्यवैशिष्ट्यं वर्णयत।** **१४**

**अथवा**

**भगवतो बुद्धस्य जन्ममाहात्म्यं लिखत।**

**५. कानिचित् त्रीणि सूत्राणि सोदाहरणानि व्याख्येयानि।** **१२**

**क.** हो ढः

**ख.** एकाचो बशो भष् झषन्तस्य स्ध्वोः

**ग.** धात्वादेः षः सः।

**घ.** सहेः साडः सः।

**ङ.** दिव औत्

**६. कौचिद् द्वौ प्रयोगौ ससूत्रं साधनीयौ।** **८**

**क. विश्ववाट्**

**ख. लिड्**

**ग. दुहः**

**घ. अनड्वान्**

**७. अधोलिखितेषु कमप्येकमवलम्ब्य निबन्धो लेख्यः-** **७**

**क.**बुद्धः

**ख.**विश्वशान्तिः

**ग.** भोटदेशः

********************